श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री अऴगिय मणवाळ जीयर् अनुगृहीतं

# ॥ श्री नृसिंहाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहाष्टकम् ॥

श्रीमदकलङ्कपरिपूर्णशशिकोटि -
    श्रीधर मनोहर सटापटलकान्त।
पालय कृपालय भवाम्बुधि निमग्नं
    दैत्यवरकाल नरसिंह ! नरसिंह ! ॥ 1 ॥

पादकमलावनतपातकिजनानां
    पातकदवानल पतत्रिवरकेतो।
भावन परायण भवार्तिहरया मां
    पाहि कृपयैव नरसिंह ! नरसिंह ! ॥ 2 ॥

तुङ्गनख पङ्क्ति दलितासुरवरासृक् -
    पङ्कनवकुङ्कुमविपङ्किलमहोरः।
पण्डितनिधान कमलालय नमस्ते
    पङ्कजनिषण्ण नरसिंह ! नरसिंह ! ॥ 3 ॥

मौळिषु विभूषणमिवामरवराणां
    योगिहृदयेषु च शिरस्सु निगमानाम्।
राजदरविन्दरुचिरं पदयुगं ते
    देहि मम मूर्ध्नि नरसिंह ! नरसिंह ! ॥ 4 ॥

वारिजविलोचन मदन्तिमदशायां
    क्लेशविवशीकृतसमस्तकरणायाम्।
एहि रमया सह शरण्य ! विहगानां
    नाथमधिरुह्य नरसिंह ! नरसिंह ! ॥ 5 ॥

sundar kidambi dot com

हाटककिरीटवरहारवनमाला -
तारशनामकरकुण्डलमणीन्द्रैः।
भूषितमशेष निलयं तव वपुर्मे
चेतसि चकास्तु नरसिंह ! नरसिंह ! ॥ 6 ॥

इन्दुरविपावकविलोचन रमायाः
मन्दिर महाभुजलसद्वररथाङ्ग !।
सुन्दर चिराय रमतां त्वयि मनो मे
नन्दितसुरेश नरसिंह ! नरसिंह ! ॥ 7 ॥

माधव मुकुन्द मधुसूदन मुरारे
वामन नृसिंह शरणं भव नतानाम्।
कामद घृणिन् निखिलकारण नयेयं
कालममरेश नरसिंह ! नरसिंह ! ॥ 8 ॥

अष्टकमिदं सकलपातकभयघ्नं
कामदमशेषदुरितामयरिपुघ्नम्।
यः पठति सन्ततमशेषनिलयं ते
गच्छति पदं स नरसिंह ! नरसिंह ! ॥ 9 ॥

॥ इति श्री नृसिंहाष्टकं समाप्तम् ॥